Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतविद्यासमिति-पत्रिका

संस्कृतश्रीः

SAMSKRITASRI
A Monthly Journal of
Samskrit Education Society
தனி ப்ரதி
விலை ரூ. 4
APRIL- 2019

ஸம்ஸ்க்ருதஶ்ரீ:
ஸம்ஸ்க்ருத கல்விக்
கழக மாத இதழ்
212/13-1,
செயின்ட் மேரிஸ் ரோடு,
மந்தைவெளி, சென்னை-28

दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः ।
दारितदशमुखकीर्तिः पुरतो मम भातु हनुमतो मूर्तिः ।।

ஸீதையின் துயரத்தைப் போக்கியதும் ராமபிரானின் பெருமையின் செழுமையை பரப்பியதும் ராவணனின் புகழைக் குலைத்ததுமான ஹனுமானின் திருவடிவம் என் முன்னே ஒளிரட்டும்.

ஹனுமத் பஞ்சரத்னம்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

உ

✆ 24951402

THE SAMSKRIT EDUCATION SOCIETY (Regd.) MADRAS

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

Secretary & Treasurer : **Sri G. SITHARAMAN**, F.C.A.
Editor and Publisher : **S. SRINIVASA SARMA**
Associate Editor : **Dr. G. Sankaranarayanan**
Department of Sanskrit,
SCSVMV Univeristy, Enathur,
Kanchipuram, Tamilnadu
Cell : 99941 03957

1.	ஸ்ரீமதி சாந்தா ஸ்ரீநிவாஸன், ஆழ்வார்ப்பேட்டை	98843 12214
2.	ஸ்ரீமதி மாலதீ பாலசுப்ரமண்யம், மேடவாக்கம்	[illegible]84158110
3.	ஸ்ரீமதி சாந்தி அசோக், மந்தைவெளி	24951402
4.	ஸ்ரீமதி கௌரீ கருணாகரன், மைலாப்பூர்,	24320[illegible]44
5.	ஸ்ரீமதி ரமாசுந்தரராஜன், சென்னை -95,	65[illegible]35
6.	ஸ்ரீமத் பார்வதீ ராமசந்திரன் அண்ணா நகர்	26[illegible]9
7.	ஸ்ரீ R. முத்து கிருஷ்ண ன் கொரட்டூர்	2687[illegible]
8.	ஸ்ரீ S. ரங்கநாத சர்மா, சேலையூர்	22291720
9.	ஸ்ரீமதி புவனேச்வரீ ராஜகீழ்பாக்கம்	9841212047
10.	ஸ்ரீ K. ராஜேச்வரீ மாடம்பாக்கம்	9962837319
11.	ஸ்ரீ S. ஹரிஹரன் நங்கைநல்லூர்	9841403859
12.	ஸ்ரீ S. அனந்தன், மதுராந்தகம்	9894709418
13.	ஸ்ரீ P.R. சுப்ரமண்யம், ஓ.ஓ. நகர்	23640864
14.	ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய ஸ்ரீரங்கம்	2430632
15.	ஸ்ரீமதி ராஜம் சுந்தர், திருநெல்வேலி	9488326850
16.	ஸ்ரீ P.D. ஸ்ரீநிவாஸன், திருநின்றவூர்	9445703470
17.	ஸ்ரீ R. ரங்கநாதன், காஞ்சீபுரம்	97910 55428
18.	ஸ்ரீ C.A. ஏகாம்பரம், கோயம்புத்தூர்	0422-2233242
19.	ஸ்ரீமதி டி.வி. ஜயலக்ஷ்மி சர்மா, புன்குன்னம், த்ரிசூர்-680 002,	0487-2382964
20.	ஸ்ரீமதி கௌரிவேங்கடராமன், காட்கோபர், Mumbai East	09757115154

ஸ்ரீ வி. கோதண்டராமன், Mrs. கீதா ரேகா,ஆதம்பாக்கம் 9444469638.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्रीः

माला : ४१ April - 2019 पुष्पम् : ०४

कलि : ५१२१ विकारी - मेषमासः ४१-०४

The Samskrit Education Society Established with the blessings of His Holiness **SRI MAHASWAMIGAL** of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:
Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai – 600 028.

PRESENT ACTIVITES
1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI Founder Editor
Vaidyasri
S.V.RADHAKRISHNA SASTRI

Hon. Editor
Dr.N.VEEZHINATHAN

Editor and Publisher
Prof.S.SRINIVASA SARMA

Associate Editor
Dr. G. SANKARANARAYANAN

Hon. Academic Advisors :
Dr.K.SRINIVASAN,
K.S.R.I.Chennai.
SMT. SANTA SRINIVASAN, SES,
Chennai.

Associate Editors :
Pandit S. Ranganatha Sarma,
Chennai.
Prof. G. Srinivasu, Kanchipuram.
Prof.C.V.Seshadri, Chidambaram.

Technical Assistants :
Dr. V. Nagarajan
Dr. S. Thiagarajan

"DD/Cheque should be sent by Speed Post only"

१. सम्पादकीयम् ४
२. निपुणप्राघुणकम्................५
३. सत्यम् अद्वैतम्..................७
४. श्रीनृसिंहदशकम् ९
५. रघुवंशम् ११
६. मन्त्रार्थचिन्तनम् १४
७. तिरुक्कुरल् १६
८. रूपकावली...................... १८
९. अष्टाङ्गहृदयम् २०
१०. करुणामृतम् २२
११. योगरहस्यम् २५
१२. तस्यामेव ....न विषेहिरे.....२८
१३. त्रिविधमौषधम् ३१
१४. शब्दविमर्शः ३४
१५. शास्त्रं ज्योतिः प्रकाशार्थम्...३८
१६. आधुनिकसमस्याः तत्समाधानञ्च . ४१
१७. काव्यस्वरूपविवेचनम्.......४४
१८. पदरञ्जनी ४८

SUBSCRIPTION RATES

ANNUAL	: Rs. 40/-
LIFE SUBSCRIPTION	: Rs. 400/-
PAGE DONATION	: RS.200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer.

The Samskrit Education Society (Regd.),
Old 212/13-1, St.Mary's Road,
Mandaiveli, Chennai - 600 028.
Ph: 044 - 24951402
Mail: samskritasri@gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सम्पादकीयम्

लेखाभिरामा सुधियां मनोज्ञा
या ज्ञानभूषैः विविधैर्लसन्ती।
विद्योतते रूपवतीव नारी
सा संस्कृतश्रीः जयतान्नितान्तम्।।

शासनव्यवस्था काचिदपूर्वा या न केवलं मानवजातावपि च पश्वादिष्वपि संलक्ष्यते। शासनेन शासिता एव प्रजाः समभिवर्धन्ते। तदुक्तमर्थशास्त्रकारेण योगक्षेमसाधनकरो दण्ड इति। शासनव्यवस्था यदि धीमतो निर्वहणकुशलस्य हस्ते तर्हि प्रजाः परमामोदभूमोदयतां पश्यन्ति। अत आह कविकुलगुरुः

प्रजानां विनयादानात् रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।।

इति। पितृतुल्यस्थानमिदं प्रजाभरणाभिधं कर्म। तादृशं कर्मयोगमनुतिष्ठद्भिः ऋषिकल्पव्यवहारैः भाव्यम्। अत एव राजर्षिव्यवहारोऽस्माकं राजनीतिग्रन्थेषूपदर्शितः। इदानीं दृश्यं भिन्नम्। प्रजाः निजभरणकलाकोविदं चिन्वन्तीति राजनीतिग्रन्थाप्रसिद्धोयं नयः। अतः न केवलं नेतृषु किन्तु प्रजास्वप्यस्ति किञ्चिदुत्तरदायित्वम्। निर्वाचने कर्तव्यं बद्धश्रद्धैः करणीयम्। नेदं वेदविहितं वा शास्त्रानुसारि वा कर्म। अथापि ऐहिकामुष्मिकश्रेयःप्राप्त्यै शासनव्यवस्थायाः भवति किञ्चिद्वैशिष्ट्यम्। अतोऽस्माकं कर्तव्यं ज्ञात्वास्माभिः शासनव्यवस्थास्थिरिकरणाय शिष्टाचारोयं पालनीयः। शासनव्यवस्थामाधारीकृत्यैवास्माकं लोकयात्रा तथा विद्यादिप्राप्तिः विलसतीति वेदितव्योऽयमाचारः येन ऐहिकामुष्मिकश्रेयःप्राप्त्यै अस्माकमवकाशोऽपि स्थिरीभवतीति प्रार्थयते सम्पादकवर्गः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

निपुणप्राघुणकम् (भाणः)

Dr. SHANKAR RAJARAMAN
Bangalore

(आकर्ण्य) - किं ब्रवीषि - 'इदानीमेव श्रुतं मया यदार्येणाद्य सौरिकगणे विश्वासमुत्पाद्य दण्डान्मोचितः प्रियवयस्यो मिलिन्दकः ।अपि तथ्य एष उदन्तः?' इति । (स्वगतम्) - एषा खलु रथ्यायां धर्मसभा सञ्जाता । (साशङ्कं)

जन्मान्तरेभ्योऽपि निगूढमन्ता-
रहस्यमुद्घाटयितुं समर्थैः ।
प्रश्नैः पटीयानिव कार्मणज्ञो
वार्ताहरः साध्वसमातनोति ।।५०।।

(प्रकाशं) वयस्य, यन्मया कृतमद्य तत्सौरिकगणस्य हितायैव । अपि च यन्मिलिन्दको रक्षितस्तत्र सुहृद्धर्मो हेतुर्नपुनर्दोषपक्षपातः । (आकर्ण्य) किं ब्रवीषि - 'श्रूयते यत्पानागारप्रसङ्गादनन्तरं चित्रलेखामिलिन्दकयोः स्नेहो भग्न इति । नूनमार्योऽत्र जानात्यधिकम्' । (स्वगतम्) एष हि वार्ताहराणां रहस्यभेदनोपायः । (प्रकाशं) जानास्येव माथुरक यद्विपदि किल परीक्ष्यते स्नेहः । पश्य -

अपि दुर्विषहेण रंहसा
विपदोघस्य विभिद्यते न यत् ।
प्रणयाकृतिरन्तरङ्गयोः
स हि सेतुः प्रलयेऽपि निश्चलः ।।५१।।

(आकर्ण्य) किं ब्रवीषि - 'सम्यङ्निरूपितमार्येण प्रेम्णस्तत्त्वम्' इति । वयस्य, तेन हि साधयाम्यहम् ।

(परिक्रम्य, अवलोक्य)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कथमासन्नैव सञ्जाता कुसुमविक्रेतुर्मणिकण्ठस्य विपणी ।

एषा पुष्पप्रभेदैरनिशमधिगतैर्यावनीभ्यो वनीभ्यो नानावर्णस्य खण्डैरिव हरिधनुषो निःसरोजैः सरोजैः । [स-रोजैः = with roses]

वाचामिन्द्रावरोधश्रुतिविहितसुधामाधुरीणां धुरीणां

मालामाक्रष्टुमीष्टे सुरतरुकुसुमस्तोमलीनामलीनाम् ।। ५२

(निरूप्य, सविलक्षस्मितं)

स्थूला पतिष्यति हि जन्मदिने स्त्रगेषा

कस्यापि राज्यसचिवापसदस्य कण्ठे ।

यस्मान्मदेन महता ध्रियमाणमुच्चै-

स्तस्योत्तमाङ्गमपि यास्यति नम्रभावम् ।।५३।।

(सविषादं) हन्त, दयनीयानि खल्विमानि कुसुमानि । कुतः -

कालक्रमेण रमणीजनकेशभारे

कार्श्यं प्रयाति सितपक्ष इवान्धकारे ।

सम्पद्यते सुमनसामधुना तु वासो

हस्तेषु केवलमहो जडदेवलानाम् ।।५४।।

(अनुवर्तते....)

नीतिद्विषष्टिका

एतावदेव हि फलं पर्याप्तं ज्ञानसत्वयुक्तस्य।

यद्यापत्सु न मुह्यति नाभ्युदये विस्मितो भवति।।

ஞானமும் தைர்யமுமுள்ளவனுக்கு தன் ஆபத்தில் மோஹமும் வராமலும் தன் ஸம்பத்தில் ஆச்சரியம் வராமலுமிருந்தால் இதே ஞானபலம்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

SATYAM ADVAITAM

Sri. P.R. KANNAN, Mumbai

५१. संसारिणस्संसारित्वापोहेनेश्वरात्मत्वं प्रतिपादयिषितम् ।
(ब्रह्मसूत्रभाष्यम्) ४-१-२-३

By removal of the conditioning of worldly existence of the person subject to transmigratory cycle, the state of Iswara is caused to be perceived. (Brahmasutra Bhashyam 4.1.2.3)

५२. भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभावः ।
(ब्रह्मसूत्रभाष्यम्) २-१-६-१४

By separating Brahman, the phenomenon of enjoyer and the object to be enjoyed in the universe ceases to exist. (Brahmasutra Bhashyam 2.1.6.14)

५३. देहाद्यात्मप्रत्ययतिरस्कारेणाक्षरैकात्मत्वं फलमापादयेत् ।
(मुण्डकभाष्यम्) २-२-४

By rejection of the factors like body etc. opposed to Atman, the fruit of the undecaying state of unity of Atman in all beings is to be attained. (Mundaka Upanishad Bhashyam 2.2.4)

५४. तस्य सर्वात्मत्वादेव सर्वावाप्तिलक्षणं फलम् ।
(मुण्डकभाष्यम्) ३-१-१०

The characteristic of the fruit of attaining the state of unity of Atman in all beings is attain-

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ing everything. (Mundaka Upanishad Bhashyam 3.1:10)

५५. आत्मन एवेदं सर्वं आत्मैव च सर्वम् । (ईशभाष्यम्) १

All this belongs to Atman; all this is indeed Atman only. (Isa Upanishad Bhashyam 1)

५६. सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठा फलम् । (ईशभाष्यम्) १४

The fruit of renunciation of all attachments and being established in Gnana is the state of unity of Atman in all beings. (Isa Upanishad Bhashyam 14)

५७. सर्वस्य हि वेदितुः स्वात्मा ब्रह्मेति सर्ववेदान्तानां सुनिश्चितोऽर्थः । (केनोपनिषद्भाष्यम्) २-१

The final and firm conclusion of all Vedantas is that the individual indwelling Atman, known to all, is indeed Brahman. (Kenopanishad Bhashyam 2-1)

५८. न ह्यात्मानमवाप्स्यर्थं ब्रह्म मन्यमानः प्रवृत्तिं प्रयोजनवतीं पश्यति । (केनोपनिषद्भाष्यम्) वा.भा.-२. १

For attaining Atman, one who reckons Atman (individual Self) to be Brahman does not find it useful to engage in activities. (Kenopanishad Vakya Bhashyam 2.1)

[To be continued....]

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्रीनृसिंहदशकम्

Prof. Dr. N. KANNAN,
Head, Department of Oriental Studies & Research,
SASTRA - Deemed to be Unviersity,Thanjavur.

विनतासुतवाहनमीशमजं
विनताखिलकिल्बिषसंघहरम्।
नवनीरदभासुरसंहननं
भज रे नर मानरकेसरिणम्।। १

पृथुसुन्दरदुग्धसमुद्रगृहं
मृदुभोगधराधिपतल्पगतम्।
करुणावरुणालयमादिलयं
भज रे परमाद्भुतकेसरिणम्।। २

मकरध्वजतातमकामहतं
प्लवगध्वजमित्रवरं सततम्।
मलयध्वजराजसुताग्रभवं
भज रे गरुडध्वजकेसरिणम्।। ३

निगमोद्धरणं भज मीनतनुं
विबुधोद्धरणं कमठं च वरम्।
भुवनोद्धरणं सितकोलतनुं
भज रे हरिणीधरकेसरिणम्।। ४

दनुजेन्द्रहिरण्यगजेन्द्रभिदं
दिवसेन्द्रभवं सुहिरण्यतनुम्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कलभेन्द्रकयाधुभवार्तिहरं
भज रे भवनाशनकेसरिणम्।। ५

दितदानवनायकदानमदं
बलिमस्तकधत्ततृतीयपदम्।
विधिपूजितनिर्जरसिन्धुपदं
भज रे पुरुषोत्तमकेसरिणम्।। ६

ससहस्त्रसुतक्षितिपालगण-
क्षतिकारणभीषणभद्रतनुम्।
सकुठारमुनिं जगदग्निसुतं
भज रे कलिनाशनकेसरिणम्।। ७

रविवंशसरोजसहस्त्रकरं
मिथिलापतिजास्यचकोरविधुम्।
दशकन्धरतूलभरज्वलनं
भज रे नयनत्रयकेसरिणम्।। ८

मधुसूदनवेणुधरेण समं
मधुशर्करयेव सदा मिलितम्।
हलिनं बलभद्रममोघबलं
भज रे परमं नरकेसरिणम्।। ९

भगवन्तमखण्डरसाम्बुनिधिं
निगमान्तसुगीतपदाम्बुरुहम्।
तमनन्तमनादिमकारपदं भज
रेऽवनिसुन्दरकेसरिणम्।। १०

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रघुवंशम्

Sri. R.RANGANATHAN,
Sanskrit Education Society, Kanchipuram

रघुवंशे द्वादशसर्गे पञ्चषष्टितमः श्लोकः

स प्राप हृदयन्यस्तमणिस्पर्शनिमीलितः।
अपयोधरसंसर्गां प्रियालिङ्गननिर्वृतिम्।।

पदच्छेदः

सः, प्राप, हृदयन्यस्तमणिस्पर्शनिमीलितः, अपयोधरसंसर्गां, प्रियालिङ्गननिर्वृतिम्।

शब्दधातुरूपाणि

सः - दका. पु. प्र. एक।
प्राप - प्राप, प्रापतुः, प्रापुः
या प्रापणे इति धातोः लिटि. प्र. पु. एक।
हृदयन्यस्तमणिस्पर्शनिमीलितः - रामशब्दवत्
अपयोधरसंसर्गाम् - आका. स्त्री. द्वि. एक।
प्रियालिङ्गननिर्वृतिम् - इका. स्त्री. द्वि. एक।

प्रतिपदार्थः -

हृदयन्यस्तमणिस्पर्शनिमीलितः - மார்பில் வைக்கப்பட்ட சூடாமணியின் ஸ்பரிச சுகத்தால் பரவசமடைந்த, सः - அந்த ராமர், अपयोधरसंसर्गाम् - ஸ்தனஸ்பர்சமற்ற, प्रियालिङ्गननिर्वृतिम्- ஸீதையை தழுவுதலால் வரும் இன்பத்தை, प्राप - அடைந்தார்.

व्याकरणविशेषाः

हृदयन्यस्तमणिस्पर्शनिमीलितः - हृदये न्यस्तः हृदयन्यस्तः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

हृदयन्यस्तश्चासौ मणिश्च हृदयन्यस्तमणिः। तस्य स्पर्शः तेन निमीलितः।

अपयोधरसंसर्गाम् - अविद्यमानौ पयोधरयोः संस्पर्शः यस्याः सा। ताम्।

प्रियालिङ्गननिर्वृतिम् - प्रियायाः आलिङ्गनं, तेन निर्वृतिः। ताम्।

भावार्थः

हनूमत्प्रदत्तचूडामणेः वक्षसि स्थापनेन मुदितः रामः सीतालिङ्गनमानन्दमवाप।।

रघुवंशे द्वादशसर्गे षट्षष्टितमः श्लोकः

श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम्।।

पदच्छेदः

श्रुत्वा, रामः, प्रियोदन्तं, मेने, तत्सङ्गमोत्सुकः, महार्णवपरिक्षेपं, लङ्कायाः, परिखालघुम्।

शब्दधातुरूपाणि

श्रुत्वा - क्त्वान्तमव्ययम्

रामः, तत्सङ्गमोत्सुखः - अका. पुं. प्र. एक।

प्रियोदन्तं, महार्णवपरिक्षेपं - अका. पुं. द्वि. एक।

परिखालघुम् - उका. पुं. द्वि. एक।

मेने - मेने, मेनाते, मेनिरे
मेन ज्ञाने इति धातोः लिटि
प्र.. पुं. एक।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

लङ्कायाः - आका. स्त्री. ष. एक।

प्रतिपदार्थः -

प्रियोदन्तं - அன்பினாலான ஸீதையின் செய்தியை, श्रुत्वा- கேட்டு, तत्सङ्गमोत्सुकः - அவளை சந்திப்பதில் ஆவலுள்ள, रामः - ராமர், लङ्कायाः - இலங்கையின், महार्णवपरिक्षेपम् - சுற்றிலுமுள்ள கடலை, परिखालघुम् - அகழிபோல் சிறியதாக, मेने - கருதினார்.

व्याकरणविशेषः

प्रियोदन्तं - प्रियायाः उदन्तः। तम्।
तत्सङ्गमोत्सुकः - तस्याः सङ्गमः तस्मिन् उत्सुकः।
महार्णवपरिक्षेपम् - महार्णव एव परिक्षेपः। तम्।
परिखालघुम् - परिखावत् लघुः। तम्।

कोषः

वार्ताप्रवृत्तिर्वृत्तान्तः उदन्तः स्यादथाह्वयः।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरार्णवः।
खेयं तु परिखा (दुर्गात् बहिः यत्परितः खातं क्रियते तस्य)

भावार्थः

हनुमद्द्वारा सीतायाः प्राप्तवृत्तान्तः रामः तस्याः मेलने उत्कण्ठितः महासागरपरिवेषं दुर्गवेष्टनवत् सुतरमिति अमन्यत।

(अनुवर्तते....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मन्त्रार्थचिन्तनम् - २१ अग्ने नाशय संदृशः

Dr. M. JAYARAMAN
Krishnamacharya Yoga Mandiram, Chennai

स तान् वाच्यायया सह। अग्ने नाशय संदृशः।
ईर्ष्यासूये बुभुक्षाम्। मन्युं कृत्यां च दीधिरे ।
रथेन किँ शुकावता। अग्ने नाशय संदृशः।।

तैत्तिरीयारण्यकम् १.२८.१

सायणभाष्यानुसारी अर्थः

वाच्याया इत्येषा परिबाधादिकान्, जनानाम् आर्तिजनकान् दुष्टान् जनयामास। सा काचित् अलक्ष्मीः। हे अग्ने! वाच्यायया जनन्या साकं, तया जनिताः याः दुष्टशक्तयः, तासाम् अस्मदभिमुखा अहितकारिणी दृष्टिः नाशिता भवतु भवता। किञ्च, अस्मद्वैरिणः अस्मासु ईर्ष्यादिकाः निन्द्याः भावनाः जनयितुं प्रयतन्ते। काः ताः? ईर्ष्या - परगुणानाम् असहनम्। असूया - परनिन्दा। बुभुक्षा - क्षुद्बाधा (दुर्भिक्षम्), मन्युः - क्रोधः, कृत्या - अभिचारक्रियाः। हे अग्ने ! तान् एतादृशान् शत्रून् तेषां वाहकेन रथेन साकं नाशय। किञ्च तेषां रथेषु किंशुकाः दुष्टपक्षिणः, पीडाजनकाः भवन्ति। तानपि नाशय।

विवरणम्

भारतदेशस्य समकालिकस्थितेः आधारेण अस्य मन्त्रस्य विवरणं चिन्त्यते। सद्यः भारतस्य अन्तः बहिश्च वैरिणः सक्रियाः दृश्यन्ते। शत्रुदेशप्रेरि(षि)ताः भारतीय-सैनिकानां मारणहोमं चक्रुः। किञ्च तद्देशप्रेरिताः, देशभक्तिहीनाः केचन भारतस्य अन्तः अपि

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

जनेषु भेदभावरूपस्य विषवृक्षस्य जलसेचनमपि कुर्वन्तः सन्ति। किंशुकाः इव केचन कुत्सितं भाषमाणाः जनमतिविभ्रमकारकाः दृश्यन्ते। तादृश्यः अन्तर्बहिश्च व्याप्य वर्तमानाः ताः प्रतिकूलाः शक्तयः सम्मुखीकरणीयाः। प्रत्यवायनिवारणपुरस्सरं भारतदेशस्य प्रगतिः साधनीया। सात्त्विकशक्तयः सबलाः प्रबलाः च करणीयाः एतत्सिद्धये। तदर्थं सर्वैः जनैः सत्पात्रचयनं विधेयं देशं तद्दिशि नेतुम्। तादृशे पुण्यकर्मणि अग्निदेवः अस्माकं बुद्धिं प्रविश्य - सुपथा राये अस्मान् नयतु ।

किञ्च तदर्थं वैदिकप्रार्थनाः अपि अपेक्षिताः। रघुवंशे दिलीपः वसिष्ठस्य कुलगुरोः शत्रुप्रशमनधुरीणायाः मन्त्रशक्तेः प्रशंसामेवं विधत्ते-

तव मन्त्रकृतो मन्त्रैः दूरात् प्रशमितारिभिः।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः।। १.६१।।

तदर्थेयम् अग्निप्रार्थना सर्वैः अनुसन्धेया येन देशस्य योगक्षेमः सिद्ध्येत्, भारतीया आर्षपरम्परा च परिरक्षिता स्यात्।

(अनुवर्तते....)

नीतिद्विषष्टिका

नीचेषु कार्ययुक्तिः साधुप्रणयक्रियासु चाशक्तिः।
सहवासश्चानार्यैः आर्यस्य गुरूणि दुःखानि।।

பெரியோர்களுக்கு - நீசர்களிடம் காரியங்கள் ஆகவேண்டியிருப்பது, ஸாதுக்களுக்கு விருப்பம் போல் செய்ய முடியாதிருப்பது, துர்ஜனங்களுடன் சேர்ந்து வாஸம் - இவைகளே பெரிய துக்கம்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्लोकानुरूपः
तिरुक्कुरल्

நன்றியில் செல்வம் - असत्संपत्तिः

श्रीकलियन् रामानुजजीयर् (भूतपूर्वः),
नाङ्गुनेरि

வைத்தான்வாய் சான்ற பெரும்பொருள் அஃதுண்ணான்
செத்தான் செயக்கிடந்தது இல்.
अत्यन्तविपुले वित्ते स्वस्मिन् सत्यपि लोभतः।
न भङ्‌क्तेचेत्स मृतः यत् कार्यं तस्य नैव हि।।

பொருளானாம் எல்லாமென்று ஈயாது இவறும்
மருளானாம் மாணாப் பிறப்பு.
धनेनैवेह सर्वं स्यादिति सञ्चिन्त्य लोभतः।
अतिकार्पण्यमोहेन नीचजन्मगतिर्भवेत्।।

ஈட்டம் இவறி இசைவேண்டா ஆடவர்
தோற்றம் நிலக்குப் பொறை.
धनोपार्जनमात्रेच्छायुतानां लोभिनां नृणाम्।
यशस्स्पृहाविहीनानां जन्म भारो ध्रुवं भुवः।।

எச்சமென்று என்எண்ணுங் கொல்லோ ஒருவரால்
நச்சப் படாஅ தவன்.
लोकेऽत्र लोभी कस्यापि स्पृहापात्रं न यो नरः।
स किं वा मनुते मृत्योः पश्चात्स्वस्य भविष्यति।।

கொடுப்பதூஉம் துய்ப்பதூஉம் இல்லார்க்கு அடுக்கிய
கோடிஉண் டாயினும் இல்.
न योग्येभ्यः प्रददति न स्वयञ्चोपभुञ्जते।
ये तेषु कोटिशो वित्तमपि निष्फलमेव हि।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ஏதம் பெருஞ்செல்வம் தான்றுவ்வான் தக்கார்க்கொன்று
ஈதல் இயல்பிலா தான்.

न भुञ्जानस्स्वयमपि योग्येभ्योऽप्यददन्नरः।
निजस्यैव महावित्तस्यात्र व्याधिः स्वयं भवेत्॥

அற்றார்க்கொன்று ஆற்றாதான் செல்வம் மிகநலம்
பெற்றாள் தமியள்மூத் தற்று.

प्रार्थितं निर्धनेभ्योऽत्र नरस्यायच्छतो धनम्।
अनाथा वार्धकं प्राप्ता नारीवात्यन्तसुन्दरी॥

நச்சப் படாதவன் செல்வம் நடுவூருள்
நச்சு மரம்பழுத் தற்று.

अस्पृह्यस्येह केनापि कृपणस्य धनं भुवि।
विषवृक्षः फलैः पूर्णः ग्राममध्ये यथा तथा॥

அன்பொரீஇத் தற்செற்று அறநோக்காது ஈட்டிய
ஒண்பொருள் கொள்வார் பிறர்.

बन्धुप्रेम परित्यज्य स्वं भोगं धर्ममप्यथ।
वित्तं सम्पादितं ह्यन्ये गृहीत्वा परिभुञ्जते॥

சீருடைச் செல்வர் சிறுதுனி மாரி
வறங்கூர்ந் தனையது உடைத்து.

श्रेष्ठोपार्जितवित्तानां दारिद्र्यं ह्यल्पकालिकम्।
लोकोपकारिमेघस्य शुष्कत्वमिव तद्भवेत्॥

Articles for SAMSKRITASRI can be sent to:

editorsamskritasri@gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रूपकावली - बन्धनम्

Prof. VISHNU POTTY. V.S.
Kanchipuram

(पात्राणि - सूत्रधारः, नटी, चन्दनः, अर्जुनोपमः, द्वारपालः, अध्यक्षः, एकः भटः) नान्द्यन्ते ततः प्रविशति सूत्रधारः-

अल्पीकृताखिलमहीरुहसद्गुणेन
तन्वङ्गि वक्षसि लसन्हरति ज्वरं यः।
ईशस्य पूजनविधौ कृतदेहलोपः
स त्वं जुषध्वमिह सत्कृतिमस्मदीयाम्।।

सूत्रधारः (विचारं नाटयित्वा) अद्य खलु चिराय उषित्वा नगरे जीविकां पुरस्कृत्य सकुटुम्बोऽस्मद्गृहमागमिष्यति पुत्रः वार्षिकोत्सवसम्मेलनाय। तद्यावद्गृहीणीमाहूय संभारलोपं पृच्छामि। नेपथ्याभिमुखं दृष्ट्वा आर्ये इतस्तावत्।

नटी (प्रविश्य) आर्य। इयमस्मि। को नियोगः।

सूत्रधारः नास्ति कश्चन नियोगस्तव। वयं किल नियोज्याः भवाम अद्य।

नटी सर्वदा खल्वन्तरायोत्पादनं मुख्यं कर्म भवताम्। तर्ह्याह्वानं किं निमित्तम्? शृङ्गारदर्शनाय वा?

सूत्रधारः तदेतद् दृष्टपूर्वमेव। इदानीं केवलं स्मरणमात्रानुभाव्यमिति खिद्यते नश्चेतः।

नटी अलं हास्येन। उच्यतां तावज्जिज्ञासा।

सूत्रधारः अद्य खलु पुत्रोऽस्मददर्शनार्थमागमिष्यति।

नटी अद्यैव। कोऽत्र विशेषः ? इदन्तु सांवत्सरिकं कर्म किल।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सूत्रधारः नैवम्। पुत्रागमनमधिकृत्य कृतेषु संभारेषु विद्यते वा काऽपि न्यूनतेति प्रष्टुकाम आसम्।

नटी तत्रैव संलग्नास्मि। परं यद्यद्वस्तुजातं स्ववस्थापितं बहु तत्र लुप्तं दृश्यते।

सूत्रधारः अद्यत्वे सर्वे सर्वं विलुण्ठन्ति किल। नास्ति लोके तादृशं किञ्चन वस्तु न विलुण्ठनीयमिति।
विलुण्ठ्य तावद्गृहमपि शुक्लीकरोति। तथा हि।

पुत्रस्य लुण्ठति पिता पितुरेव माता
पत्नी पतेर्हरति भ्रातुरथान्यभ्राता।
वक्तुन्न पारयति कस्य धनं यथा कः
मुष्णाति सत्वपुरुषो मलयाद्रिजं भोः।।२

नटी आर्य। कोऽत्र प्रसङ्गः मलयाचलस्य? अथवा किं सूरणकन्दप्रसङ्गे गजगवेषणकथया?

सूत्रधारः न तथा। अद्य खल्वहं मोषणप्रसङ्गे वर्तमानपत्रिकासु पठितं वृत्तान्तं स्मरन्नेवमुक्तवान्।

नटी ननु निक्षिपाम्यार्यशिरसि संभारान्वेषणभारम् अहं तावत्पश्यामि दिनपत्रिकाम्।

सूत्रधारः रक्षिपुरुषस्य मलयाचलसर्ववृक्षनिवेदितपरिदेवन-परिहारान्वेषणप्रवृत्तस्यैव मार्गे पतितोस्मि।
सूक्ष्मेक्षणेनाप्युपलप्स्येत वा किञ्चिदिति सन्देह एव।

इति प्रस्तावना।

(अनुवर्तते....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

அஷ்டாங்க ஹ்ருதயம்

Prof. S. SWAMINATHAN
Sri Jayendra Saraswathi Ayurveda College, Poonamallee

चैत्यपूज्यध्वजाशस्तच्छायाभस्मतुषाशुचीन् ।। ३३
नाक्रामेच्-छर्करा-लोष्ट-बलि-स्नान-भुवो न च ।
नदीं तरेन्न बाहुभ्यां नाग्नि-स्कन्धम् अभिव्रजेत् ।। ३४
संदिग्ध-नावं वृक्षं च नारोहेद् दुष्ट-यानवत् ।

चैत्य - முக உருவம் இல்லாத தெய்வஸாந்நித்யம் நிறைந்த கற்கள், पूज्य - பூஜிக்கத் தகுந்த, ध्वज - கொடிமரம், अशस्तच्छाया- நீசர்கள் இவர்களுடைய நிழல், भस्म -तुषा- अशुचीन् - பஸ்மம், உமி, அசுத்தவஸ்துக்கள் இவைகளையும், शर्करा-लोष्ट-बलि-स्नान-भुवः च - சிறுமண்-கட்டிகள், மண்ணாங்கட்டி, ப-பீடம், குளிக்குமிடம் இவைகளையும், न आक्रमेत् - மிதிப்பதோ, தாண்டுவதோ கூடாது, बाहुभ्यां नदीं न तरेत् - ஆறுகளை நீந்திக் கடக்கக் கூடாது, अग्निस्कन्धं न अभिव्रजेत् - தீக்குண்டத்தின் அருகில் போகக் கூடாது, संदिग्धनावं वृक्षं च - சந்தேகமுள்ள படகுகளிலும், மரங்களிலும், दुष्टयानवत् - கட்டுக்கடங்காத குதிரை, யானை போன்றவற்றின் மீது, न आरोहेत् - ஏறக்கூடாது.

नासंवृतमुखः कुर्यात् क्षुतिहास्यविजृम्भणम्।। ३५
नासिकां न विकुष्णीयान्ना-कस्माद् विलिखेद् भुवम् ।
नाङ्गैश्-चेष्टेत विगुणं नासीतोत्कटकश्चिरम् ।। ३६

असंवृतमुखः - முகத்தை மறைக்காமல், क्षुतिहास्यविजृम्भणं - தும்முவதோ, சிரிப்பதோ, கொட்டாவி விடுவதோ, न कुर्यात् -

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

செய்யக்கூடாது, नासिकां न विकुष्णीयात् - மூக்கை விரலை விட்டு நோண்டக் கூடாது, अकस्मात् - தேவையின்றி, भुवं न विलिखेत् - பூமியைக் கீறக்கூடாது, अङ्गैः - உடல் உறுப்புகளை, विगुणं न चेष्टेत - தேவையற்ற விதத்தில் வளைப்பதோ, ஆட்டுவதோ கூடாது, चिरम् उत्कटकः न आसीत- காலைத் குத்திட்டு நெடுநேரம் அமரக் கூடாது.

देहवाक्चेतसां चेष्टाः प्राक् श्रमाद् विनिवर्तयेत् ।
नोर्ध्वजानश्चिरं तिष्ठेन् नक्तं सेवेत न द्रुमम् ।। ३७
तथा चत्वरचैत्यान्तश्चतुष्पथसुरालयान् ।
सूनाटवीशून्यगृहश्मशानानि दिवापि न ।। ३८

देहवाक्चेतसां चेष्टाः - உடலாலும், வாக்காலும், மனதாலும் செய்யக்கூடிய செயல்கள், श्रमात् प्राक् - அவை சோர்வடையும் முன்பே, विनिवर्तयेत् - நிறுத்திக்கொள்ளவேண்டும், ऊर्ध्वजानुः - முட்டிக்கால்களை மேலாக வைத்துக்கொண்டு, चिरं न तिष्ठेत् - நீண்டநேரம் அமர்ந்திருப்பதோ, படுத்திருப்பதோ கூடாது, नक्तं द्रुमं न सेवेत - இரவில் மரத்தின் அருகில் செல்லக் கூடாது, तथा - அதுபோலவே, चत्वर-चैत्यान्तश्-चतुष्-पथ-सुरालयान् - மூன்று வழிகள் சேரக்கூடிய இடம், முக உருவம் இல்லாத தெய்வஸாந்நித்யம் நிறைந்த கற்கள், நான்கு வழிகள் சேரக்கூடிய இடம், தேவாலயம் போன்ற இடங்களுக்கு, नक्तं न सेवेत - இரவில் போய் இருக்கக் கூடாது, सूनाटवी-शून्य-गृह-श्मशानानि - கொலைநிலம், ஆள்நடமாட்டமில்லா காடு மற்றும் வீடு, மயானம் ஆகிய இடங்களுக்கு, दिवापि न (सेवेत) - பகலிலும் போகக்கூடாது.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

करुणामृतम्

(गुरुवायुपुरेशवैभवम् - अनुवर्तते)

तामरश्शेरि शङ्करन् भट्टतिरिकृतम्

अग्रे विभान्तमतिमोहनमिन्द्रनील-
कान्तिप्रवाहशिशिरीकृतभक्तलोकम्।
सत्यावबोधसुखकल्पितबालरूपं
पिञ्छावतंसपरिभूषितकेशभारम्।।

लोलाम्बुदालकविचुम्बितचन्द्रलेखा-
साम्यावहालिकतडोज्ज्वलदूर्ध्वपुण्ड्रम्।
दूरीकृताखिलजनार्त्तिकृपाकटाक्षं
लीलाविलासनलिनायतचारुनेत्रम्।।

औन्नत्यसौष्ठवनिरस्ततिलप्रसून-
नासापुटं मुकुरनिर्मलमञ्जुगण्डम्।
आलोलमीनकुण्डलशोभिकर्णं
बिम्बाधरप्रसृतसुन्दरमन्दहासम्।।

अत्युज्ज्वलाकलितकौस्तुभदिव्यरत्न
शोणप्रभामसृणशङ्खसमानकण्ठम्।
श्रीवत्सहारवनमाल्यविभूषणादि-
श्रीलोरसं द्रुहिणजन्मदनाभिरन्ध्रम्।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

निर्वाणदोचितवरार्पणसूचनार्थ-
हैयङ्गवीनमुरलीविलसत्कराब्जम्।
व्याप्तत्रिलोकमपि पायसवाञ्छयेव
व्यक्तातिकार्श्यमुदरं मृदु दर्शयन्तम्।।

पीताम्बरावृतरणत्मणिकिङ्किणीक-
काञ्चीकलापमुखलीकृतमध्यभागम्।
कैशोरकौतुकविवर्द्धकशोणवर्ण-
कौपीनधारिणमतुल्यघनोरुयुग्मम्।।

संसारभीकरसमुद्रनिमग्नलोक-
सन्तारणात्मगतजृम्भितदार्ढ्यजानुम्।
उद्घोषिताऽनतजनावनमञ्जुचञ्च-
न्मञ्जीरत् ढङ्कृतिमनोज्ञपदारविन्दम्।।

साकारसर्वजनभाग्यमुपाधिहीन-
कारुण्यवर्षणविलोलमवर्णनीयम्।
वातालयेश्वर विलोक्य भवन्तमेवं
धन्योस्मि लब्धपरमात्मसुखानुभूतिः।।

विश्वप्रेमनिधानवायुनिलय प्रद्योतमानस्मित
व्यक्ताभीष्टवरप्रदाननिभृतं बद्धाञ्जलिः प्रार्थये।
पश्यन्तं परिकीर्तयन्तमनिशं त्वां चिन्तयन्तं च मां
सच्चित्सौख्यसुधार्णवोर्मिनिचये मज्जन्तमित्थं कुरु।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

समर्पणं फलश्रुतिश्च

वातालयेश बहुविश्रुत भट्टपाद
पुन्तानमुख्यकविवर्णितपुण्यकीर्त्ते
अज्ञाततावकमहिम्नि नुवत्यनल्प
लज्जादिभावविवशेऽपि मयि प्रसीद।।

पत्रं जलं फलसुमादि च भावयुक्त-
मङ्गीकरोमि सरसं कथितं त्वयेति।
तत्राप्यधैर्यकरमस्ति विशेषणं तत्-
कृत्वानुभावपरिपूर्णमिदं गृहाण।।

कृष्ण त्वदीय करुणामृतसिद्धरूप-
मेतं स्तवं मधुरमालपतां जनानाम्।
अस्तु त्वदङ्घ्रिसुमयो रविराममायु-
रारोग्यसौख्यपरिपुष्टपरानुक्तिः।।

इति श्रीगुरुवायुपुरेशस्तोत्रे करुणामृताख्यो तृतीयस्सर्गः।

।। पूर्णमिदम् ।।

नीतिद्विषष्टिका

यः खलु बहुविधदोषं मित्रं पालयति स खलु पालयति।
न हि परिपालनकृत्यं गुणवति मित्रे भवति किञ्चित्।।

எவன் பல தோஷங்களுடைய மித்ரனைக்
காப்பாற்றுகிறானோ அவனே காப்பாற்றுகிறான்.
நல்ல குணமுடைய மித்ரனைக் காப்பதில் இவன்
செய்யவேண்டிய காரியம் ஒன்றுமில்லை.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

योगरहस्यम् - २०

Prof. S. VENUGOPALAN
SJSACH, Nazarathpet, Chennai

प्राणायामविषये विचारः अग्रेऽपि नीयते। हठयोगे आसनानि, षट्क्रियाः धौतिः, नौलिः इत्यादयः तदुपरिमुद्राः इति विस्तरशः कायैकविषयकाः चिन्ताः प्रवर्तन्ते। तत्र षट्क्रियाः धौतिरादयः जागरूकतया सेवनीयाः। किञ्चिदिव अनवधानतया क्रियायां लोपो वा, अन्यथा करणेन वा महान् कायिकः श्रमः आपद्येत। कदाचित् प्राणावरोधोऽपि सम्भवेत्। कुण्डलिन्यादीनामभ्यासे प्राणाः नाड्यन्तरेषु अनपेक्षितासु प्रविष्टाश्चेत् शरीरं स्तम्भयेयुः। अत एव हठयोगप्रदीपिकायामेव प्राणायामस्य मुख्यत्वकथनावसरे **प्राणायामैरेव सर्वे प्रशुष्यन्ति मला इति। आचार्याणां तु केषाञ्चिदन्यत्कर्म न सम्मतम्** इति शरीरस्य शोधनकार्ये धौतीप्रभृतीनामपेक्षया प्राणायाममात्रेणैव तन्निर्वाहः सुलभः इत्युक्तम्। अस्माकं दैनन्दिनसन्ध्याद्यनुष्ठानेषु अपेक्षितमात्रया प्राणायामस्य क्रियमाणत्वात् पृथक् तस्य अभ्यासः नापेक्षितः। परन्तु केषुचित् सन्दर्भेषु श्वासकोशावरोधेषु कपालभातिप्रभृतीनामभ्यासः योगाचार्यैः उपदिश्यते। तदा तेषां विशेषाभ्यासानां समवलम्बनेन आरोग्यं शीघ्रं लभ्येत। चित्तस्य वृत्तीनां निरोधः योगश्चेत् चित्तस्यैव निरोधः प्राणनिरोधनेन सम्भवतीति योगमतम्। **पवनो बध्यते येन मनस्तेनैव बद्ध्यते। मनो हि बध्यते येन पवनस्तेन बद्ध्यते।।** इति चित्तपवनयोः एकसूत्रबद्धता विचारवतां

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ज्ञातपूर्वा एव। अतश्च पूरक, रेचक, कुम्भकाख्यमार्गत्रितययुक्तस्य प्राणायामस्यास्य अनुष्ठानं सर्वत्र अस्माकं वैदिककर्मानुष्ठाने अविनाभावि कर्म भवति। गृह्यसूत्रकाराः सर्वेऽपि सर्वेषु होमेषु समाप्तेः पूर्वं प्रायश्चित्ततया प्राणायामान् एव विदधति। प्राणायामेन पापनाशः इति अनेन ज्ञायते। मनसा एव पापपुण्यादिकं क्रियते इत्यतः तादृशस्य मनसः निग्रहकार्ये प्रवृत्तिः पापनिग्रहे एव प्रत्यवस्यति इत्यतः प्राणायामस्य माहात्म्यं बहु वर्तते। ब्रह्मचारिणः आरभ्य सन्न्यासिपर्यन्तं सर्वेषां वर्णाश्रमगतानां प्राणायामः अनिवार्यः। परन्तु अधिकारिभेदेन तत्र क्रियायामपि क्वचित् भेदः विद्यते एव। सः तु नैसर्गिकः एव। तत्र काचिदाशङ्का तस्मिन् सति (आसनस्तैर्ये सति) तन्निमित्तकः प्राणायामः श्वासप्रश्वासयोः गतिविच्छेदरूपः इति लक्षणकथने, तद्विशेषु रेचकपूरककुम्भकप्रकारेषु तदनुगतेः अयोगात् कथं लक्षणं संप्रगच्छति इति चेत् नैष दोषः। सर्वत्रापि श्वासप्रश्वासयोः गतिविच्छेदसम्भवात्।।

तथा हि कौष्ट्यस्य वायोः निर्गमनं रेचकः, यः प्रश्वासरूपः। बाह्यस्य वायोः अन्तरापूर्यधारणं पूरकः, यः श्वासरूपः। अन्तः स्तम्भवृत्तिः कुम्भकः, यस्मिन् जलमिव कुम्भे निश्चलतया प्राणाख्यो वायुः अवस्थाप्यते, तत्र सर्वत्र स्वासप्रश्वासयोः गतिविच्छेदः अस्त्येव इति नास्ति शङ्कावकाशः। ननु कुम्भके गत्यभावेऽपि रेचकपूरकयोः उच्छ्वास-निश्वासगती विद्येते इति चेत्, नैष दोषः। अधिकमात्राभ्यासेन स्वभावसिद्धायाः समप्राणगतेः विच्छेदसम्भवात्। तथा च उक्तलक्षणस्य तिसृष्वपि अवस्थासु पूरकरेचककुम्भकाख्यासु विद्यमानत्वात्

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

लक्षणसङ्गतिः दृश्यते एव। **स तु (प्राणायामः) बाह्य-आभ्यन्तर-स्तम्भवृत्तिः देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः** इति सूत्रेण अयं प्राणायामः त्रिप्रकारकः इति ज्ञायते। तत्र देशेन कालेन सङ्ख्यया च उपलक्षितो दीर्घसूक्ष्मसंज्ञो भवति। तत्र देशेन उपलक्षितो भवति नासिकायाः द्वादशाङ्गुलदूरपरिमितः सन्। कालेनोपलक्षितो भवति षट्त्रिंशन्मात्रादिप्रमाणतया। तथैव सङ्ख्ययोपलक्षितो यथा - इयतो वारान् कृतः प्राणायामः एतावद्भिः श्वासप्रश्वासैः प्रथमः उद्घातो भवति इति। एतज्ज्ञानार्थमेव सङ्ख्याग्रहणमुपात्तम्। उद्घातो नाम नाभिमूलात् प्रेरितस्य वायोः शिरसि अभिहननमेव। एवं प्रकारेण दीर्घतया सूक्ष्मतया च सम्पादितोऽभ्यासः प्राणायामस्य फलमस्मभ्यं पूर्णतया प्रयच्छेत्। तथा च सर्वावस्थासु सर्वदा अनुष्टेयतया विहितस्यास्य प्राणायामस्य अनुष्ठानेन वयमपि लौकिकालौकिकफलं सर्वम् अपि सम्पाद्य सुखं चिरं जीवेम।।

(अनुवर्तते....)

नीतिद्विषष्टिका

कृत्वा जगत्प्रकाशं प्रीतिं सर्वात्मना मनुष्येण।
विषमरसान्यपि सुहृदां शीलान्यनुवर्तितव्यानि।।

மனிதன் செய்ய வேண்டியது இது தான். உலகில் தன் பிரீதியைப் பிரகாசப்படுத்தி ஸ்நேஹிதர்களின் பலவிதமான ஸ்வபாவங்களை அநுசரிக்க வேண்டும்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे

Dr. M. VINOTH
French Institute of Pondicherry,

कविकुलगुरुणा कालिदासेन रघुवंशकीर्त्तिप्रतिपादनपरं रघुवंशाख्यं महाकाव्यं प्रणीतमितु सर्वजनविदितमेव। यद्यपि तेन विरचितेषु सर्वेषु काव्येषु नाटकेषु च तस्य विद्वत्तायाः परां काष्ठां ज्ञातुं शक्नुमः तथाऽपि विशिष्टतया रघुवंशमहाकाव्येन तस्य नैकशास्त्रनैपुण्यं ज्ञातुं शक्नुमः। इतरकृत्यपेक्षया नैके विषयाः सन्निहिताः वर्तन्ते अस्मिन् रघुवंशे महाकविना। तेषु चरित्रविषयाः, पर्यावरणविषयाः, राजनैतिकविषयाः, ओषधिविषयाः, साहित्यविषयाः, व्याकरणविषयाश्च अन्यतमाः भवन्ति। उदाहरणतया रघुवंशस्य चतुर्थे सर्गे-

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे।।

(रघुवंशम् ४.४९)

इति रघोः प्रतापविषये वर्णयति कविः। अत्र तेजोनिधिः सूर्योऽपि यदा दक्षिणस्यां दिशि प्रयाति तदा तस्यापि प्रभावः परिहीयते किन्तु दक्षिणस्यां दिशि प्रयातं रघोः प्रतापं सोढुम् पाण्ड्याः असमर्थाः बभूवुः इति पद्यस्य अस्यार्थः। अत्र हि पाण्ड्याः इति शब्दः श्रूयते यस्यार्थः पाण्डुदेशीय राजान इति। तत्र कश्चन व्याकरणांशः निहितः वर्तते। तदर्थं कानिचन सूत्राणि सामान्यरूपेण ज्ञेयानि भवन्ति।

आदौ- **जनपदशब्दात् क्षत्त्रियादञ्** (अष्टाध्यायी ४.१.१६८) इति सूत्रम्। अनेन सूत्रेण जनपदवाची सन् यः क्षत्रियवाची शब्दः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तस्मादञ् प्रत्ययः विधीयते अपत्ये अर्थे विवक्षिते। अत्र एकं वार्तिकं श्रूयते- **पाण्डोर्ड्यण्** (वार्तिकम् २६७१) इति। पाण्डुशब्दात् ड्यण् प्रत्ययः स्यात्पूर्वोक्ते अर्थे इति वार्तिकस्य अर्थः। अधुना पाण्डोः अपत्यं पाण्डोः देशस्य राजा वा इति विग्रहे प्रकृतवार्तिकेन पाण्डुशब्दात् ड्यण् प्रत्यये पाण्ड्यः इति एकवचनरूपं भवति। तस्य द्विवचने पाण्ड्यौ इति रूपम्। बहुवचनविवक्षायाः पूर्वम् अन्यदेकं सूत्रं ज्ञेयं भवति यत् **तद्राजस्य बहुषु तेनैवास्त्रियाम्** (अष्टाध्यायी २.४.६२) इति। अस्य सूत्रस्य अयमर्थः- तद्राजप्रत्ययस्य बहुषु अर्थेषु तदर्थकृतबहुत्वे नाम तद्राजप्रत्ययेन कृते बहुत्वे विवक्षिते लुक् स्यात्, न तु स्त्रियाम् इति। कोऽयं तद्राजप्रत्ययः इति चेत् ? **ते तद्राजाः** (अष्टाध्यायी ४.१.१७४) इत्यनेन सूत्रेण आदौ यदुक्तं जनपदेत्यादिसूत्रं तस्मात्सूत्रादारभ्य विहिताः अञादयः प्रत्ययाः तद्राजसंज्ञकाः स्युरितिं अञादिप्रत्ययानां तद्राजसंज्ञा विधीयते। तेन तदन्तर्भूतस्य ड्यणप्रत्ययस्यापि अधुना तद्राजसंज्ञा सिद्ध्यति।

अधुना श्लोकार्थं किञ्चित् स्मरामः - तस्यां दक्षिणस्यां दिशि रघुमहाराजस्य प्रतापं पाण्ड्याः न विषेहिरे इति श्रूयते। तथा सति अधुना संशयः जायेत यदत्र पाण्ड्याः इति बहुवचनविवक्षायां कथं वा ड्यणप्रत्ययस्य श्रवणं, बहुत्वविवक्षायां तस्य लुग्विधानात् इति। बहुवचनविवक्षायां तु पाण्ड्यशब्दात् जस्-प्रत्यये पाण्ड्य जस् इति स्थिते तद्राजस्य बहुषु तेनैवास्त्रियाम् इत्यनेन सूत्रेण लुक् कुतो न भवति इति संशयः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तत्रैवं समाधानं ब्रवीति बालमनोरमाकारः ? पाण्ड्या इत्यत्र केवलं ड्यण् प्रत्ययः नास्ति। तत्र यत्प्रत्ययोऽपि वर्तते इति। प्रकृते अर्थात् श्लोके श्रूयमाणः पाण्ड्यशब्दः यत्प्रत्ययान्तः। तत्कथमिति चेत् ? **तत्र साधुः** (अष्टाध्यायी ४.४८९) इत्यनेन सूत्रेण सप्तमीसमर्थात् साधुः इत्येतस्मिन्नर्थे यत्प्रत्ययः विहितः। तथा च पाण्ड्ये साधु इति विग्रहे पाण्ड्यशब्दात् यत्प्रत्यये पाण्ड्य यत् इति स्थिते, **यस्येति च** (अष्टाध्यायी ६.४.१४८) इत्यनेन सूत्रेण पाण्ड्यशब्दस्य यकारोत्तर-अकारस्य लोपे, पाण्ड्य् य इति जाते, **लोपो व्योर्वलि** (अष्टाध्यायी ६.१.६६) इत्यनेन सूत्रेण डकारोत्तरयकारस्य लोपे पाण्ड्य इति जाते, तस्य बहुवचनविवक्षायां जस् प्रत्यये अधुना यत्प्रत्यय एव वर्तते न तु तद्राजप्रत्ययः ड्य इति न तस्य लुक्। अतश्च बहुवचनरूपं श्रूयते पाण्ड्या इति तत्तु साधुरूपमेव इति ज्ञेयम्।

किञ्च अवेधांशः कश्चन वर्तते। तत्र पाण्ड्ये साधुरित्युक्त्वा, तस्मात् यत्प्रत्यये, तस्य बहुवचने पाण्ड्या इति रूपस्य साधनं क्रियते। किमेतावता कथनं, किं वा तस्य तात्पर्यमिति चेत् - पाण्डुदेशीयेषु राजसु साधवः ये राजानः ते एव तस्य रघोः प्रतापं सोढुं न शक्नुवन्ति स्म इति चेदसाधूनां विषये किं वा वक्तव्यमित्यर्थः। तादृशः प्रतापोऽसीत् रघुमहाराजस्य इति वक्तुमेव सूक्ष्मेक्षिकदृष्ट्या महाकविना एतादृशः प्रयोगः कृत इति ज्ञेयः। अत एव खलु अद्यावधि तत्तुल्यकवेः अभावः वर्तते इति ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

त्रिविधमौषधम् - ८

Sri.S.BALASUBRAMANIAN
Ms. B. RENGA PADMINI
IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

रोगचिकित्सायां मन्त्राणां प्रयोगो द्विविधो भवति इति वयं दृष्टवन्तः। तथा वेदोक्तमन्त्रचिकित्साविषयेऽपि दृष्टवन्तः। आयुर्वेदोक्तं मन्त्रप्रयोजनम् इतः विस्तरेण पश्यामः।

क. रोगचिकित्सायाम् आयुर्वेदे मन्त्राणाम् औषधवत्प्रयोगः

आयुर्वेदे त्रिविधा व्याधयः उक्ताः। दोषजः, कर्मजः, दोषकर्मजश्चेति। उक्तं हि अष्टाङ्गहृदये -

यथानिदानं दोषोत्थः कर्मजो हेतुभिर्विना।
महारम्भोऽल्पके हेतावातन्को दोषकर्मजः।।
विपक्षशीलनात् पूर्वः कर्मजः कर्मसंक्षयात्।
गच्छत्युभयजन्मा तु दोषकर्मक्षयात् क्षयम्। (अ.हृ.सू.१२)

कर्मक्षयात् इति पूर्वजन्मकृतपापानाम् उपशमनात्। पापशमनार्थं मन्त्रादियुक्तदैवव्यपाश्रयचिकित्सा एव करणीया। ज्वरचिकित्सिते चरकसंहितायाम् ,

सोमं सानुचरं देवं समातृगणमीश्वरम्।
पूजयन् प्रयतः शीघ्रं मुच्यते विषमज्वरात्।।
विष्णुं सहस्रमूर्धानं चराचरपतिं विभुम्।
स्तुवन्नामसहस्रेण ज्वरान् सर्वानपोहति।।
ब्रह्माणमश्विनाविन्द्रं हुतभक्षं हिमाचलम्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गङ्गां मरुद्गाणांश्चेष्ट्या पूजयन् जयति ज्वरान्।।

(च.चि.३/३१०-३१३)

ज्वरचिकित्सार्थं मन्त्रस्य प्रयोगः बहुमुख्यो भवति। किमर्थं? उक्तम्-

देहेन्द्रियमनसस्तापी सर्वरोगाग्रजो बली।

ज्वरः प्रधानो रोगाणामुक्तो भगवता पुरा।।

तस्य प्राणिसपत्नस्य ध्रुवस्य प्रलयोदये। (च.चि.३/४)

ज्वरादीनां घोररोगाणामुपशमनार्थाय मन्त्रादिप्रयोगः युज्यते, येन चिकित्सा सुलभतरा स्यात्। देहेन्द्रियमनसां तापकारणात् औषधानि एव अपर्याप्तानि।

कुष्ठं महागदेषु अन्यतमः। मन्त्रप्रयोगः इहापि बहुमुख्यः भवति रोगाणां पापकरणनिदानात्। अष्टाङ्गहृदये कुष्ठचिकित्सायामुक्तम् -

व्रतदमयमसेवा त्यागशीलाभियोगो

द्विजसुरगुरुपूजा सर्वसत्त्वेषु मैत्री।

शिवशिवसुतताराभास्कराराधनानि

प्रकटितमलपापं कुष्ठमुन्मूलयन्ति।।(अ .हृ.चि.१९/९८)

कुष्ठं ज्वरश्चेति रोगद्वये मन्त्रप्रयोगः अधिकः उक्तः। सामान्येन यदा व्याधिः कर्मजः भवति तदा मन्त्रादिदैवव्यपाश्रयचिकित्सा एव करणीया इति अस्माभिः ज्ञातव्यम्।

ख. रोगचिकित्सायां मन्त्राणाम् अदृश्यमाणरूपप्रयोगः

चिकित्सारम्भात् प्राक् चिकित्सासिद्धये ईश्वरः प्रार्थ्यते।

अत्र मन्त्रप्रयोगः द्रव्यग्रहणसमयात् आरभ्य कर्मानन्तरं रोगिणः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रक्षाकर्माणि यावत् क्रियते इति वयमुक्तवन्तः। विस्तारेण पश्यामः। द्रव्यग्रहणविषये शारङ्गधरसंहितायामुक्तम् -

गृह्णीयात्तानि सुमनाः शुचिः प्रातः सुवासरे।
आदित्यसंमुखो मौनी नमस्कृत्य शिवं हृदि।
साधारणधरा द्रव्यं गृह्णीयादुत्तराश्रितम्।। (शा.प्र.१/५७)

शिवस्य प्रार्थना मन्त्रानुसारेण करणीया यथा रुद्रनमकं तथा चमकं उच्चारणीयम्। शिवप्रार्थना रुद्रनमकेन चमकेन वा कर्तुं शक्या।

आयुर्वेदे क्रियमाणेषु पञ्चकर्मसु वमनाख्ये अन्यतमकर्मणि औषधदानसमये वक्तव्यो मन्त्रः उक्तः। मन्त्रेण विना औषधसम्पदि सत्यामपि कार्यफलं न प्राप्यते। स मन्त्रः -

ब्रह्मादक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः।
ऋषयः सौषधिग्रामा भूतसंघाश्च पान्तु वः।।
रसायनमिवर्षीणाममराणामिवामृतम्।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते।।
ओम् नमो भगवते भैषज्यगुरवे वैडूर्यप्रभाराजाय।
तथागतायार्हते सम्यक् संबुद्धाय।
तद्यथा ओम् भैषज्ये महाभैषज्ये समुद्गते स्वाहा।।

(अ.हृ.सू.१८/१६,१७)

कायचिकित्सायाम् आधुनिके रसशास्त्रस्य प्रयोगः प्रसिद्धत्वमाप्यमानोस्ति। रसशास्त्रे मन्त्रप्रयोगः बहुविस्तारो भवति। अग्रिमपरिस्तुतौ रसशास्त्रे मन्त्रप्रयोग इति विषये पश्यामः।

(अनुवर्तते....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शब्दविमर्शः - १० डुकृञ् धातोरनेकार्थकप्रयोगाः

Dr. V. R. MANOJ
Chinmaya International Foundation, Veliyannad, Kerala

मनसा गोचरीकारे चित्तेरकरोति - चित्तेकुरुते। मनसिकरोति - मनसिकुरुते। उरसिकरोति - उरसिकुरुते। [to assent or adopt, take to the heart etc.]

चित्ते, मनसि, उरसि इत्येतत्पूर्वकः कृञ् धातुः। मौण्ड्ये मद्राकरोति - मद्राकुरुते। भद्राकरोति - भद्राकुरुते। [to shave, clip, crop, cut, lop-off, pare, shear, tonsure, trim.]

मुण्डनं भद्राकरणम्। मद्रा तथा भद्राशब्दपूर्वष्टा कृञ् धातुः। **साक्षात्प्रभृतीनि च** (१.४.७४) इति मद्रेत्यस्य **गतिसंज्ञायां कुगतिप्रादयः** (२.२.१८) इति समासः।

विलम्बने समयाकरोति - समयाकुरुते। [to delay, defer, adjourn, hesitate, hold-up, slow-down, wait, etc.]

समयान्तिकमध्ययोः तथा समया निकषा हिरुक् इति चामरः। **समयाच्च यापनायाम्** (५.४.६०) इति समयशब्दात् डाच्। अनुबन्धलोपे समय अ आ अ कृञ्। समयेत्यव्ययं हिरुगर्थे। **स्वरादिनिपातमव्ययम्** (१.१.३७) इत्यनेन सङ्गृहीतत्वात्।

शब्दकर्मके अकर्मके च विकुरुते। [to make sound, behave whimsically]

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विपूर्वः कृञ् धातुः। **वेः शब्दकर्मः** (१.३.३४) **अकर्मकाच्च** (१.३.३५) इति सूत्राभ्यामात्मनेपदम्। क्रोष्टा विकुरुते स्वरान् इति शब्दकर्मकस्योदाहृतं काशिकायाम्। अकर्मकात्तु ओदनस्य पूर्णाश्छात्रा विकुर्वते। निष्फलं चेष्टन्त इत्यर्थः।

संस्कृतौ संस्करोति - संस्कुरुते। [to refine, culture, consecrate, prepare, embellish, etc.]

संस्कृतः व्युत्पन्नप्रहतक्षुण्णाः इत्यमरः। सम्पूर्वः कृञ् धातुः। **सम्परिभ्यां करोतौ भूषणे** (६.१.१३७) इति सुडागमः। **समः सुटि** (८.३.५) इति समो रुत्वे तस्य **खरवसानयोर्विसर्जनीयः** (८.३.१५) इति विसर्गे तस्य **वा शरि** (८.३.३६) इति रुत्वे तस्य **खरवसानयोर्विसर्जनीयः** (८.३.१५) इति विसर्गे तस्य **वा शरि** (८.३.३६) इति पाक्षिके विसर्गे च प्राप्ते **सम्पुंकानां सो वक्तव्यः** (८.३.५-वा.१) इति सः।

सव्यथे संपुङ्खशरप्रवेशनेन हिंसायाम् निष्पत्राकरोति - निष्पत्राकुरुते। सपत्राकरोति - सपत्राकुरुते। [to wound with an arrow or other feathered weapon so that the feathers enter the body or to pierce with an arrow so that the feathers come through on the other side]

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सपत्रनिष्पत्रादतिव्यथने (५.४.६१) इति सपत्रनिष्पत्र-शब्दाभ्यां डाच्कृञो योगे। अनुबन्धलोपे सपत्र एवं निष्पत्र अ आअ कृञ्। सपुङ्खशरस्यापरपार्श्वेन निर्गमनान्निष्पत्रं करोतीत्यर्थः। सपुङ्खशरप्रवेशनेन सपत्रं करोतीत्यर्थः। यथा सपत्राकरोति मृगम्। साह्ये सजूः करोति - सजूः कुरुते। सत्राकरोति - सत्राकुरुते। [to assist, help, endure, together-with]

सार्धं तु साकं सत्रा समं सहेत्यमरः। सजूः तथा सत्राशब्दपूर्वश्च कृञ् धातुः। सजूः सहार्थे। **ऊर्यादिच्विडाचश्च** (१.४.६१) इति सजूष् शब्दस्य गतिसंज्ञा।

सूचने उत्कुरुते। [to trace-out, spy, ascertain, indicate, reveal etc.]

सूचयतीत्यर्थः। सूचनं हि प्राणवियोगानुकूलत्वाद्धिंसैवेति सिद्धान्तकौमुद्याम्। उत्पूर्वः कृञ् धातुः।

सेवने साहसिक्ये प्रकथने उपयोगे च प्रकुरुते। [to act precariously, pronounce, to be useful, etc.]

प्रपूर्वः कृञ् धातुः। अनादरेऽर्थे विप्रकरोति - विप्रकुरुते इति गतम्। **गन्धनावक्षेपण** (१.३.३२) इत्यादिना आत्मनेपदम्। परदारान् प्रकुरुते। तेषु सहसा प्रवर्तते इति कौमुद्याम्।

हविर्दाने स्वाहाकरोति - स्वाहाकुरुते। वौषट्करोति - वौषट्कुरुते। वषट्करोति - वषट्कुरुते। [to consecrate or

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

sacrifice by uttering स्वाहा etc.]

स्वाहावौषड्वषड्भ्यः परः कृञ् धातुः। हिंसायाम् अर्दालीकरोति। आतालीकरोति। केवालीकरोति। केवासीकरोति। खेवालीकरोति। गेवालीकरोति। पर्वालीकरोति। मसमसाकरोति। मस्मसाकरोति। पर्यालीकरोति। वर्षालीकरोति। शेवालीकरोति। सेवालीकरोति। [to assail, destroy, harm, trouble, etc.]

अर्धाली आताली केवाली केवासी खेवाली गेवाली पर्वाली मसमसा मस्मसा पर्याली वर्षाली शेवाली सेवाली इत्येतेभ्यः परः कृञ् धातुः। अर्धालीत्यादीन्यव्ययानि। **ऊर्यादिच्विडाचश्च** (१.४.६१) इत्यत्र गणे सङ्गृहीतानि। हूतौ अथवा आह्वाने आकारयति। [to call, invite, summon, welcome, etc.] हूतिराकारणाह्वानमित्यमरः। आङ्पूर्वः कृञ् धातुः। हेतुमण्ण्यन्तः।

(अनुवर्तते....)

नीतिद्विषष्टिका

अभिगम्यास्ते सद्भिः व्यपगतमानावमानदोषश्च।
ये खगृहमुपगतानां श्रममुपचारैर्व्यपनयन्ति।।

எவர்கள் தன் வீட்டுக்கு வந்தவர்களைத் தனக்கு மானம் அவமானம் இவைகளைப் பொருட்படுத்தாமல் உபசரிக்கிறார்களோ அவர்களையே ஸஜ்ஜனங்கள் அடையட்டும்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शास्त्रं ज्योतिः प्रकाशार्थम् - ४

Ms. DHWANI J.
IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

नमः संस्कृतसेवकेभ्यः ! गतमासे कुतः शास्त्रोक्तस्य आचार्य्यस्य कर्म अद्य विद्यालयाः एव कुर्वन्तीति चर्चितम्। अधुना तस्यैवाचार्यभूतस्य विद्यालयस्य चरकेण वर्णितैः गुणैः सह चर्चा क्रियते। अनया च चर्चया नवशैक्षिकसंवत्सरे नवविद्यालयचयने सौलभ्यमुत्पद्येतेति चिन्त्यते। तत्रेयं चरकोक्तिः - ततोऽनन्तरमाचार्यं परीक्षेत; तद्यथा - **पर्यवदातश्रुतं परिदृष्टकर्माणं दक्षं दक्षिणं शुचिं जितहस्तमुपकरणवन्तं सर्वेन्द्रियोपपन्नं प्रकृतिज्ञं प्रतिपत्तिज्ञमनुपस्कृतविद्यमनहङ्कृतमनसूयकमकोपनं क्लेशक्षमं शिष्यवत्सलमध्यापकं ज्ञापनसमर्थं चेति। एवङ्गुणो ह्याचार्यः सुक्षेत्रमार्तवो मेघ इव शस्यगुणैः सुशिष्यमाशु वैद्यगुणैः सम्पादयति।।** (चरकसंहिता- विमानस्थानम् - ८.४)

१. पर्यवदातश्रुतत्वम् परि-अव-उपसर्गयोः दैप् (दै) शोधने इति धातोः क्तप्रत्यययोगात् पर्यवदातशब्दः। अवदातो नाम श्वेतवर्णः। सर्वथा खलु श्वेतवर्णस्य शुचित्वेन सह योगः क्रियते। परि इत्युपसर्गेण परितः इत्यर्थः स्वीक्रियते। अतः परिपूर्णरूपेण सर्वतो वा विशुद्धं ज्ञानं येन श्रुतं, सः पर्यवदातश्रुतः। विद्यालयस्य पर्यवदातश्रुतत्वं तद्युक्तानामध्यापकानां परीक्षणेन ज्ञातुं शक्यम्। विद्यालयस्य जालस्थानतः साक्षात्परिप्रश्नतः वा अध्यापकानां ज्ञानं ज्ञेयम्। विद्यालयापेक्षिताः के गुणाः इति पूर्वमस्माभिश्चर्चितम्। ते च गुणाः पर्यवदातश्रुतत्वं बोधयन्ति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

२. परिदृष्टकर्मत्वम् विद्यालयप्रसङ्गे परिदृष्टकर्मत्वं प्रयोगशाला-निमित्तम् अतीव प्रसक्तं तिष्ठति। रटनमात्रेण ये शास्त्राधीताख्याः ते प्रायेण प्रयोगशालायां पठितानां शास्त्राणाम् अवतरणे स्खलन्ति। ये तु पठितस्य शास्त्रस्य साक्षात्कारणे समर्थास्तिष्ठन्ति, त एव विविधैरध्यापनमार्गैः छात्रान् बोधयन्ति। पुस्तके पठितानां विषयाणां भौतिकरीत्या अवतारणे क्वचिदेव विद्यालयेषु छात्राः प्रेरिता वर्तन्ते। सैषा प्रेरणा न खलु साध्या अन्यत्र परिदृष्टकर्मभ्यः अध्यापकेभ्यः।

३. दक्षम् दक्षम् = अवामबुद्धिमिति व्याख्याकारः चक्रपाणिः। अदुष्टबुद्धिं शुद्धबुद्धिमिति यावत्। विद्यालयस्य अवामबुद्धित्वं तु तच्छात्रैः तदध्यापकैश्चैव बोध्यम्। अत्र विद्यालये पठितवतां छात्राणां सामाजिकजालतन्त्रैः परिचयः उपयोगाय कल्पेत।

४. दक्षिणम् दक्ष् वृद्धौ इति धातोः इनन्प्रत्यययोगात् दक्षिणशब्दः। अतो दक्षिणमिति वर्धमानम्। विद्यालयस्य वर्धमानत्वं विविधैः मार्गैः मातुं शक्यम्।

५. शुचिम् विद्यालयस्य पर्यावरणशुचित्वं तु साक्षाद्द्रष्टुं शक्यम्। बाह्यशौचमतिरिच्य अन्यान्यपि शौचानि शास्त्रेषूक्तानि। यथा मनुस्मृतौ-

सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्।
योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः।। इति।

तत्र तु विना अर्थशौचात् बाह्यशौचस्य महत्त्वं नास्तीति भावो भण्यते। सत्यमेव सम्प्रति विद्यालयः धनसम्पादनार्थम् उचितकरणत्वेन युज्यते। विद्यालयस्य अर्थशौचत्वं तस्मै दत्तस्य शुल्कस्य स्वच्छप्राप्तिपत्रप्रदानेन मीयते। इतोऽपि शौचविधानि शास्त्रान्तरेषूक्तानि चेदपि प्रसङ्गत्वादेतावदेवात्र गृहीतम्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

६. जितहस्तम् हस्तः कर्मेन्द्रियेषु अन्यतमः। तत्र हस्तस्य कर्मोक्तं - हस्तौ ग्रहणधारणे (च.शा. १.२६.) इति। विद्यालयप्रसङ्गे ग्रहणधारणे के स्याताम्? विद्यालयः छात्रानेव गृह्णाति, तानेव च धारयत्यपि। द्वे एते कर्मणी कियता साफल्येन क्रियमाणे भवतः इति विचारणीयम्।

ये तु विद्यालयाः नूतनाः स्युः तत्र छात्राणामधिकाऽपेक्षा क्रियते विद्यालयाधिकारिभिः। तत्तु क्षन्तव्यमेव, यतो हि सर्वेऽपि विद्यालयाः प्रारम्भिककाले इत्थमेव स्युः। यत्र तु कलङ्कितनामवशात् छात्राः न्यूनाः स्युः तेऽपि विद्यालयाः छात्रग्रहणे अत्यधिकां तत्परतां दर्शयेयुः। तत्परतेयम् अधिकारीणां व्यवहारस्य सूक्ष्मदर्शनेन अवगन्तुं शक्या। यदि कदाचित् अनूतनविद्यालये छात्रग्रहणवेलायाम् अत्यावश्यकी तत्परता दृश्यते, तदा अवश्यं विद्यालयविषये इतोऽपि ज्ञातव्यमस्तीति ज्ञेयम्। अपरं चास्ति धारणकर्म। यस्मिन् विद्यालये अध्यापकाः उचिताः न स्युः, छात्रसुविधाः अपर्याप्ता वा स्युः स विद्यालयः छात्रधारणे अक्षम एव स्यात्। यत्र अध्यापकाः, तेषां व्यवहारादिभावाः, सुविधाः, छात्राणां यथोचितस्वातन्त्र्यादिभिः अनुकूलपर्यावरणम् इत्यादिभावाः पर्याप्ताः स्युः, तस्मात् विद्यालयात् बहिर्गन्तव्यमिति छात्राः सामान्यतया न चिन्तयेयुः। यद्यपि विद्यालयपरिवर्तने कुटुम्बस्थित्याद्यन्यान्यपि कारणानि भवितुमर्हन्ति, तथापीमानि कारणानि मुख्यतमानि सन्ति यतो हि सत्सु उल्लिखितकारणेषु विद्यालयवातावरणमेव छात्रप्रतिकूलं स्यात्। अतः इमानि नामाङ्कनवेलायामेव अवलोकनीयानि भवन्ति।

इति चरकोक्तवाक्यात् आद्योक्तानि षडपेक्ष्याणि अस्मिन् मासे चर्चितानि। अनन्तरोक्तानि पदानि अग्रिमे मासे चर्चयिष्यन्ते।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

आधुनिकसमस्याः तत्समाधानञ्च

मह्यं देहि मदीयम् आनन्दम्

(महास्वामिनां वचः समुद्धरणपूर्वकम्)

Dr. S. THIAGARAJAN
Department of Sanskrit, SCSVMV, Kanchipuram

ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन्। यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम्।। इति वचनानुसारं कलियुगे तावत् केशवस्मरणेनैव मोक्षप्राप्तिः भवतीति आर्षवचनम्। तत्र श्रद्धया भक्त्या च केशवस्मरणं यः करोति सोऽमुत्र परमात्मनि लयमवाप्स्यतीति पुराणादिभ्यः ज्ञायते। सा भक्तिः सामान्यतया कीदृशी वा भवतु, परम् आत्मार्पणरूपा भक्तिरेव भक्तिरिति व्यवह्रियते नान्या। अत एव श्रीकृष्णः मत्त्याजी भव इति स्वयं ब्रवीति। नित्यं मन्दिरगमनं, स्तोत्रपठनादिकमपेक्षया आत्मार्पणरूपा भक्तिरेव परमात्मनि समाश्रयति इति जगद्गुरूणां वचनम्। तत्र जगद्गुरूणां वचांसि इत्थं प्रतिबिम्बितमस्ति -

भक्तप्रकाण्डः कश्चित् परमेश्वरस्य पूजां कर्त्तुमैच्छत्। सपदि तस्य काचित् महती शङ्का समुदभूत्। तत्समाधानं परमेश्वरमेव पृच्छति - हे ईश्वर! अहं तुभ्यमुपचारं करोमीति चिन्तयन् पूजां करोमि चेदपि वास्तविकेन अपचारमेव करोमीति तर्कयामि। कथमिति चेत्, अहं त्रिलोकव्याप्यं त्वच्चरणारविन्दम् एकेन उद्धरिणीजलेन प्रक्षालयितुं शक्नोमि वा? विश्वाकारं भवच्छरीरमनेनाल्पवाससाऽ-च्छादयितुं शक्नोमि वा! यदाऽहं त्वां साष्टाङ्गं नमस्करोमि तदा मम पादौ यस्यां कस्यामपि दिशि स्थापने सति तत्रापि त्वं तिष्ठसि! अतः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तव पुरतः पादप्रसृतदोषः आपद्यते ननु! अस्तु, पूजा एव मा भूत् इति प्रार्थयामीति चिन्तयामि चेत् सर्वज्ञं त्वां प्रार्थयामीति अपचारास्पदं भवति खलु! मदर्थं प्रार्थयामि इत्युक्ते त्वया न ज्ञातमेव वस्तु अहं पृच्छामीत्यर्थः खलु? त्वं सर्वज्ञः इत्यमुं विषयं मम प्रार्थना एव न्यूनीकरोति। तथापि प्रार्थना विधेया इति समुत्पन्नचिन्तोऽहम् अल्पज्ञः अस्मि, अतः तद्दोषनिवारणाय त्वां प्रार्थयामि। तदस्तु, सर्वमयं त्वां किं प्रार्थयामि, सर्वमयस्त्वमेव अहमित्यप्यसीति न जानन् मां नीचायेऽहम्। एतां समस्यामपसर्तुमिति प्रार्थये। त्वमखण्डानन्द स्वरूपोऽसि, न त्वत्तोऽन्यदस्तीति वेदो वक्ति। तथापि पूरणानन्दात्त्वत्तोऽन्योऽहं वक्रगुणसमस्यादिसमेतोऽस्मीति भावयामि। अन्यथा रुन्धन्नीदृशः कश्चित् प्रार्थयितुमागच्छतीत्यस्यावश्यकता नास्ति खलु! इत्थमहं त्वत्तोऽन्योऽस्मीति भावं निवारय! तदा त्वमेव सर्वम्, त्वमेवाहम्। तदर्थः अहमेव सर्वमिति भवति। तथाहि तद्देहीदं देहीति लौकिकं वस्तु न प्रार्थये, मामेव मह्यं देहीत्येव प्रार्थये। इति ब्रवीति सः भक्तः। अस्यामेव रीतौ शिवमानसिकपूजा स्तोत्रे प्रार्थयन्ति श्रीसदाशिवब्रह्मेन्द्राः- **मह्यं देहि च भगवन् मह्यं प्रदेहि भगवन् मदीयमेव स्वरूपमानन्दम्** इति ब्रुवन्ति।

इदानीं वयं सर्वे अस्मन्निजस्वरूपम् आच्छाद्य वेषधारिणः भवामः। अस्माकं प्रीतान् जनान् त्यक्त्वा वयं दुःखमनुभवामः, अस्मानेव त्यक्तुं कियद्दुःखमनुभवेम! अस्मदानन्दात्मस्वरूपेण साकं "तदेव वयमि"ति कदा समासामहे इति खेदः, तदुपरि चिन्ता च अस्मभ्यं सदा भवेत्। परमात्मना साकं समासितुम् इत्थमसोढ्वा

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

खेदास्पदमेव सत्यं प्रेम भवति। तस्यैव प्रेम्णः भक्तिः इति नाम।।

अस्य प्रथमं सोपानं बहिःपूजनम्, मन्दिरगमनम् इत्यादिकमावश्यकम्। लोकचिन्ताकृष्टानाम् आदावमून्येव परमात्मस्मरणसाधनानि भवन्ति। अस्मिन् घट्टे भगवान् मन्दिरादन्यत्र सर्वत्रापि व्यापृतोऽस्ति, वयमपि स भगवानेव इति अवगमनं नास्ति चेदपि न दोषः। मूलविग्रहे एव भगवान् तिष्ठति इति विचिन्त्य वयं गृहीतप्रसादं हस्तं मन्दिरस्तम्भे एव सन्धाव्यागमनेऽपि दोषः नास्ति। मूलविग्रहे वा भगवान् तिष्ठति इति चिन्तनेन तद्विग्रहे एव हस्तं न शुद्धं कुर्मः इति यावत् भवामः खलु! भगवान् नैवास्ति इति न चिन्तयन्तः यत्र कुत्रापि एकत्र भगवान् अस्त्येव इति भयभक्त्या आरभ्यते चेदेव पर्याप्तं? श्रद्धाम् अविहाय, विश्वासं असंत्यज्य, निरन्तरमभ्यासः क्रियते चेत् कालान्तरे भगवान् सर्वत्रास्ति, सर्वमयः अस्ति इति बुद्धिरायाति। बुद्धावागतममुं विषयम् अनुभवे आनेतुं मामेव मह्यं देहि च भगवन् इति निरन्तरं प्रार्थनीयम्। तदा सति ज्ञानाम्बिका कृपां करोति। इति।

नीतिद्विषष्टिका

ऐश्वर्यमल्पमेत्य प्रायेण हि दुर्जनो भवति हि मानी।
सुमहत्प्राप्यैश्वर्यं प्रशमं प्रतिपद्यते सुजनः।।

கொஞ்சம் ஐஸ்வர்யம் கிடைத்தாலும் துர்ஜனங்கள்
பெரும்பாலும் அஹங்காரத்தையடைகின்றனர்.
ஸஜ்ஜனங்கள் அதிகமாக ஐஸ்வர்யமடைந்தாலும்
சாந்தியையே அடைவர்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

काव्यस्वरूपविवेचनम्

Dr. V. NAGARAJAN
Department of Sanskrit & IC, SCSVMV, Kanchipuram

तददोषौ (अदोषौ) सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्। विष्णुमाया नियन्तारं विद्रते भक्तिपूरिता इत्यादौ काव्यत्वविघटकाच्युतसंस्कृतादिदोषवारणाय अदोषाविति पदम्। अद्रावत्र प्रज्वलत्यग्निरुच्चैः, इत्यादौ निर्गुणोऽतिव्याप्तिवारणाय सगुणाविति शब्दार्थयोर्विशेषणम्। शुष्को वृक्षस्तिष्ठत्यग्रे इत्यादौ निरलङ्कारेऽतिव्याप्तिवारणाय अनलंकृतीति विशेषणम्। वस्तुतस्तु- अनलंकृतीति पदं न लक्षणघटकम् किन्तु सालङ्कारौ शब्दार्थौ- इत्यस्य ग्राहकम्। ईषदर्थे च नञ्। शब्दार्थौ इत्यत्रार्थाश्रयत्वाच्छब्दस्य प्रागुक्तिः। अत एव कविकुलगुरुः कालिदासोऽपि वागर्थाविव सम्पृक्तौ इत्यत्र शब्दर्थौ प्राक प्रयोगं कृतवान्। **शब्दार्थौ सगुणावनलंकृती पुनः क्वापि** इति मम्मटाचार्यः।

तच्छब्देनात्र काव्यपदं परामृश्यते- काव्यस्यैव प्रकृतत्वात्। तस्माद्- दोषरहितौ शब्दार्थौ काव्यं सगुणौ गुणाभिव्यञ्जकौ क्वाप्यलङ्काररहितौ चेति समन्वयः। (आस्वादव्यञ्जकत्वस्य शब्देऽर्थे च समनिय तत्वाच्छब्दार्थयुगलमेव काव्यशरीरमिति सिद्धान्ता-नुयायिनः) नन्वत्र विचार्यते- शब्दार्थयुगलं न काव्यशब्दवाच्यम्, मानाभावात्। काव्यमुच्चैः पठ्यते, काव्यादर्शोऽवगम्यते, काव्यं श्रुतमर्थो न ज्ञात इत्यादिविश्वजनीनव्यवहारतः प्रत्युत शब्दविशेषस्यैव काव्यपदार्थत्वप्रतिपत्तेश्च। अयम्भावः नार्थः कविना उच्यते चन्द्रपर्वतादीनां सृष्टिस्तु परमात्मन इति प्रत्यक्षीकरणात्। अपि च काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तम्, प्रत्येकपर्याप्तं वा ? नाद्यः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एको न द्वाविति व्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहारस्यापत्तेः। नापि द्वितीयः, एकस्मिन्पद्ये काव्यद्वयव्यवहारापत्तेः। अतो लक्षणेऽर्थपददानं सर्वथा नोचितमिति, असति च काव्यशब्दस्य। शब्दार्थयुगलशक्तिग्राहके प्रमाणे प्रागुक्ताद् व्यवहारतः शब्दविशेषे सिध्यन्ती शक्ति को नाम निवारयितुमीष्टे। तस्माद् रमणीयार्थप्रतिपादकः शब्दः काव्यम् इति वदतो जगन्नाथस्याक्षेपः। अदोषावित्यपि न युज्यते, न हि सामान्यलक्षणे क्वचित्केनचिददोषत्वं समावेश्यते, अथ च न्यक्कारो ह्ययमेव मे यदरय इत्यत्र काव्यत्वमेव न स्यात्। स्वीकृतन्तु खल्वस्योत्तमकाव्यत्वम् ?

किञ्चाष्टमोल्लासे ये रसस्याङ्गिनो धर्माः इत्युक्त्वा गुणो रसधर्मो, न शब्दार्थयोरित्युक्तम्। ततः कथं युज्यते सगुणाविति शब्दार्थयोः विशेषणम्?

किञ्चालङ्काराभावेऽपि काव्यत्वं सालङ्कारस्य त्वर्थतः सिद्धम्। इत्यनलंकृतित्वमपि निरर्थकत्वमेव। (पण्डितराजस्तु लक्षणे गुणालङ्कारादिनिवेशो न युक्तः। उदितं मंडलं विधोः, इति काव्ये दूत्यभिसारिकाविरहिण्यादिसमुदीरितेऽभिसरणविधिनिषेध-जीवनाभावाद्विपरे गतोऽस्तमर्कः इत्यादौ चाव्याप्त्यापत्तेः। अतो लक्षणे गुणालङ्कारयोर्निवेशोनोचितः) इति, नास्मिन् लक्षणे कश्चिदंशोऽप्यदुष्ट इति विश्वनाथजगन्नाथादीनामाक्षेपः। परमेतत्सर्वमविचारमूलम्। न च सहृदयहृदयङ्गमम्। कथमिति चेत्क्रमेणोत्तरम्- तथाहि- आस्वादव्यञ्ज-कत्वस्योभयत्राप्यविशेषात् (चमत्कारिबोधजनकज्ञानविषयतावच्छेदक-धर्मवत्त्वरूपस्यानुपहसनीयकाव्यलक्षणस्य प्रकाशाद्युक्तलक्ष्यतावच्छेदक-

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

स्योभयवृत्तित्वात् काव्यं पठितं श्रुतं बुद्धमित्युभयविधव्यवहारदर्शनाच्च काव्यपदप्रवृत्तिनिमित्तं व्यासज्यवृत्तिः) अर्थात्-अस्वादोद्बोधकत्त्वमेव काव्यत्वप्रयोजकरूपं, तच्च शब्देऽर्थे चाविशिष्टम् इति भावना विषयेष्वर्थेषु सर्वथैव युक्तियुक्ता, यथा- उभौ यदि व्योम्नि पृथक् प्रवाहावाकाश-गङ्गापयसः पतेताम् अथ चैकविशिष्टस्येतरस्य काव्यत्वम्। किञ्च रमणीयार्थप्रतिपादकः शब्दः काव्यम् इति वदतो मतौ तु काव्यं श्रुतं, अर्थो न ज्ञात इत्युक्तेर्व्याघातः। यतो हि दोषगुणालङ्काराणामुभयत्र साम्येऽपि- एकस्य काव्यत्वमपरस्य नेति सर्वथाऽनुचितम्, इत्यर्थग्रहणं सुष्ठु सार्थकम्।

अनुपहसनीयकाव्यलक्षणेऽदोषावित्यप्यावश्यकम्। यतो हि- अत्र तु भगवता मम्मटेन तादृशमेव लक्षणं कृतम्, येन नात्र दोषलेशोऽप्यायाति। तथाहि उद्देश्यप्रतीतिविघातकत्वं दोषत्वम्। मुख्यार्थप्रतीतिविघातको वा दोषः इति दोषलक्षणेन नात्र कोऽपि दोषः। (सति सम्भवे- ईषद्दोषाविति चेत्तदपि न युक्तम्। यतो हि- कीटानुविद्धरत्नादि....यथा कीटानुबिद्धस्य रत्नस्य रत्नत्वं न व्याहन्यते तथैव यत्र रसप्रतीतिरस्ति तत्र दुष्टेष्वपि काव्येषु काव्यत्वं न व्याहन्यत एवेति।) अविलम्बितानपकृष्टरसविषयप्रतीतेर्विद्यमानत्वात्। यत्तु दर्पणकारादयः- काव्यलक्षणेऽत्र काव्यपदं निर्विषयं प्रविरलविषयं वेत्यादिकमुक्त्वा दोषाणां दुर्वारत्वात् वाक्यं रसात्मकं काव्यमित्याहुः, तन्न युक्तम्। वस्त्वलङ्कारप्रधानानां काव्यानामकाव्यत्वापत्तेः। न चेष्टापत्तिः- महाकविसम्प्रदायस्याकुलीभावप्रसंगात्। न च तत्रापि यथाकथञ्चित्परम्परया रसस्पर्शोऽस्त्येवेति वाच्यम्। ईदृशरसस्पर्शस्य

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गौश्चलति मृगो धावति इत्यादावतिप्रसक्तत्वेनाप्रयोजकत्वात्। तस्मात्र दर्पणकारकाव्यलक्षणमपिनिर्दुष्टं प्रत्युत प्रकाशकारोक्तन्त्वनुपहसनीय-काव्यलक्षणं सर्वापेक्षया सारपूर्णमिति निर्बाधम्। सगुणावित्यत्र तु पूर्वाचार्यरीतेरनुसरणमाश्रित्योक्तम्, पश्चात्तु केवलं स्वाश एव प्रकटितः। अथवा शब्दार्थद्वारा गुणाभिव्यक्तिरेव जायते। तस्मादत्र गुणस्य रसनिष्ठत्वेऽपि तद् व्यञ्जकपरमेव गुणपदमिति सिद्ध्यतीति दिक्। अनलङ्कृती पुनः क्वापि इत्यस्यायमाशयः- यत्र रसः स्फुटस्तत्र स्फुटालङ्काराभावेऽपि न काव्यत्वहानिः, रसभावे त्ववश्यम्भाव्यम् अलङ्कारेण। तथाहि स्फुटरसालङ्कारान्यतरविशिष्टौ शब्दार्थौ काव्यमिति फलितोऽर्थः।

अतः यः कौमारहरः इत्यत्र न कश्चन स्फुटोऽलंकारः। कारणाभावे कार्योत्पादरूपस्य विभावनालङ्कारस्य न स्फुटता, यत उत्कण्ठाभावकारणानां भावमुखेनैव वर्णनं न त्वभावमुखेन, एवं कारणसत्वे कार्यानुत्पादुरूपायाः विशेषोक्तेश्च न स्फुटता, यतः कारणस्य कथनेऽपि कार्यस्य उत्कण्ठारूपस्य न भावमुखेन कथनम्, अत उभयोरस्फुटत्वमेवेति।

नीतिद्विषष्टिका

सत्यवचनवृत्तानां शीलजटाशौचवल्कलधराणाम्।
सन्तोषाभिरतानां किमाश्रमैः कार्यमार्याणाम्।।

ஸத்ய வசனமே அனுஷ்டானம். சீலமே ஜடை,
சௌசமே மரவுரி, இந்த வேஷத்தி-ருக்கும் ஸதா
ஸந்தோஷமுள்ள பெரியோருக்கு எந்த
ஆச்ரமமாயிருந்தாலென்ன?

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पदरञ्जनी - ९

Dr. N. SRIDHAR,
SCSVMV, Kanchipuram

(अस्य समीचीनमुत्तरं editorsamskritasri@gmail.com प्रति ई-मैल् कर्तुमपि शक्नुवन्ति। समीचीनोत्तरप्रदातॄणां नामप्रकाशनम् अग्रिमसञ्चिकायाम्।)



वामतः दक्षिणम्

१. मत्स्यभेदः, युवा, विदूषकः (३)

३. म्लेच्छदेशः, वेगः, गोधूमः (३)

५. यक्ष्मरोगः (२) ६. दक्षः (२)

७. न जन्यते, उत्पातः, शुभाशुभसूचकभूकम्पादिः (३)

८. पुनर्दातुं स्वीकृतं धनम् (२) ९. इक्ष्वाकुवंशीयः सुरथराजपुत्रः (३)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

१०. हृदयोपरिकण्ठादधोभागः (२) १३. ऋते, अन्तरेण (२)
१४. मल्वैषम्यरोगः (सम्बोधने) (२)
१५. सूच्यास्यः, रात्रिजागरदः, कीटविशेषः (३)
१७. देवसकाशात् याचितः (द्वि.वि.-एकवचने) (२)
१८. अश्वः (२) २१. शापः (२)
२७. गयानदी, पितॄणां स्वर्गदायिनी (३)
२८. नक्षत्रविशेषः (३)
२९. नरकसिन्धुः, विरुद्धं तरणं तदस्यामस्तीति ..... (४)
३०. कश्चन, कः अ अपि (२) ३१. सर्पः, अहिः (२)
३२. वायुरशनं (भक्ष्यं) यस्य तम्, सर्पम् (५)
३४. गर्दभः, रावणभ्राता (२) ३६. रामपुत्रौ (४)
३९. वक्तुम् अशक्तः (२) ४०. श्लिष्टः, ल्यप्राप्तः (२)
४१. भ्रमरः (३)

उपरिष्ठात् अधः

१. कम्पनम् (३) २. तीक्ष्णः (२)
३. अग्निहोत्री (३) ४. वने भवं वनोद्भवम् वा (२)
५. सिन्दूरं, रुधिरम् (२) ७. शत्रुः (३)
८. भल्लूकः (२) १०. शशकः (३)
११. व्यजनम् (३) १२. संशयः (३)
१४. श्रेणी, पंक्तिः (३) १५. प्रकारः, ज्ञानम् (३)
२३. असारं, शून्यम् (२) २५. वानप्रस्थः, आगमविशेषः (४)
२६. द्यूतक्रीडायाम् अक्षः, खलः, धूर्तः (३)
२७. अनन्त, आदिशेषः (४) २८. वनम्, वेपन्ते जना यत्रेति (३)
२९. कणाददर्शनम् (४)
३०. शब्दानाम् अर्थसङ्ग्रहः यत्र लभ्यते (२)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

३३. नागानाम् अशनः (भक्षकः), गरुडः (४)

३४. मन्थानदण्डः (३) ३६. कण्टकारी, पत्न्याः ज्येष्ठभगिनी (२)

३७. देवहविर्दानमन्त्रः, स्वाहा (२) ३८. व्यथा (२)

एकाक्षरी

१६. लज्जा १९. शिवः, महाध्वनिः, चन्द्रमण्डलः

२०. नौका २२. न, अभावः

२४. बुद्धिः ३५. कम्पनम्

पदरञ्जनी - ८ (उत्तराणि)

ज[1]	वः		आ[2]		क्ष[3]	मा		व्र[4]	जः
व		प[5]	शु	प[6]	तिः		चा[7]	त	
नि[8]	ष्ठा		तो[9]	दः		मा[10]		ती[11]	रम्[12]
का		रो[13]	षः		कु[14]		भम्[15]		चे
	आ[16]	पः		कु[17]	ला	लः			ताम्
कृ[18]	पी		क[19]	व	यः		कृ[20]	श[21]	
	डः			चः		क[22]	पा	ली	
तु[23]		भे[24]	क[25]		श[26]	या	लुः		ने[27]
ला[28]	जः		च[29]	को[30]	रः			श[31]	मः
		इ[32]		ला		हि[33]	मा[34]	द्रिः	
स[35]	मृ[36]	ह	नी[37]		चा[38]		ण		प्र[39]
	कः		च		रम्		व[40]	न	जा
खः[41]		भ[42]	गा	ली		चू[43]	कः		पः

साधूत्तरं प्रेषितवतां विवरणम्

१. पैङ्गानाडु. वरमहावक्ष्मी

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

वानरोहं महाभागे दूतो रामस्य धीमतः ।
रामनामाङ्कितं चैव पश्य देव्यङ्गुलीयकम् ॥
वाल्मीकिरामायणम् ५.३६.२

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Registration with Registrar News Paper of India 30478 / 77
SAMSKRITASRI

मैत्रीं भजताऽखिलहृज्जेत्रीम्
आत्मवदेव परानपि पश्यत
युद्धं त्यजत, स्पर्धां त्यजत
त्यजत परेष्वक्रममाक्रमणम्
जननी पृथिवी कामदुघाऽऽस्ते
जनको देवः सकलदयालुः
दाम्यत दत्त दयध्वं जनताः
श्रेयो भूयात्सकलजनानाम् ।।

Printed by: Zigma Graphics, 9/1, Thirtharappan Street, Triplicane - 5
Edited and Published by Sri S. Srinivasa Sarma on behalf of the
Samskrit Education Society (Regd.)
Old 212/13-1, New No, 11, St. Mary's Road, R.A. Puram, Chennai - 600028.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,